Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 2 | ISSN : 2582-0095

# त्रिदोषसिद्धान्तस्य व्यावहारिकमध्ययनम्



डा.दिनेश कुमार मालवीय
पीएच. डी. शोधार्थी, राजकीय आयुर्वेद महाविद्यालय, वाराणसी, एवं रीडर, शासकीय आयुर्वेद महाविद्यालय, ग्वालियर।

प्रोफेसर डा. ए. के. सोनकर
प्रोफेसर एवं विभागाध्यक्ष, शरीर क्रिया विज्ञान, राज. आयुर्वेद महाविद्यालय, वाराणसी।

**Article Info**
Volume 4 Issue 2
Page Number: 110-112
**Publication Issue :**
March-April-2021
**Article History**
Accepted : 02 March 2021
Published : 15 March 2021

**सारांशः–** क्रियाशरीरे दोषधातौ मलविज्ञाने रोगपरीक्षायामपि उपयोगितां भजते। अतो हेतोः त्रिदोषं शरीरक्रियाविज्ञानस्य, रोगविकृतिविज्ञानस्य, कायचिकित्सायाश्चाधारो वर्तते।

**मुख्यशब्दः–** त्रिदोषः, सिद्धान्तः, सिद्धिः, व्यावहारिकमध्ययनम्, समर्थाः।

आयुर्वेदस्य सिद्धान्तेषु त्रिदोषसिद्धान्तः प्रामुख्यं भजते। एतं सिद्धान्तं विना आयुर्वेदस्य कल्पनैवासम्भवा, यतोहि अस्य उभयोः प्रयोजनयोः सिद्धिः त्रिदोषाणां वातपित्तकफाख्यानां सम्यक् परिज्ञानेन भवति। तत्र प्रथमं प्रयोजनं भवति स्वस्थस्य जनस्य स्वास्थ्यरक्षा। तदर्थं दिनचर्या-ऋतुचर्यानुसारञ्च आहारविहारानुष्ठानम्, यथर्तु स्वस्थवृत्तनियमानां पालनम्, दोषसञ्चयः, प्रकोपप्रशमनज्ञानम्, प्रकोपादिसम्बद्धदोषाणां निर्हरणम् च आवश्यकं भवति, येन रोगो नोत्पद्यते। सर्वमिदं त्रिदोषसिद्धान्ताधारितमेवास्ति।

अपरं प्रयोजनमस्ति जातरोगस्य चिकित्सा। तदर्थं निदानसम्प्राप्तिः, रोगाणां भेदोपभेदाः, चिकित्सासूत्रादीनि सर्वाणि त्रिदोषाधारितान्येव सन्ति, एतदतिरिक्तं चिकित्सासमये पथ्यापथ्यकल्पनमेतान् लक्ष्यीकृत्य भवति।

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

इत्थम् त्रिदोषसिद्धान्तस्य व्यापकताम् अवेक्ष्य अस्य गुणानां कर्मणाञ्च ज्ञानमत्यावश्यकं भवति। साम्प्रतिके काले शरीरक्रियादृष्ट्या एतेषां वैकृतगुणकर्मणां पुनरावलोकनमनिवार्यतां भजते।

त्रिदोषपरिचयः –

आयुर्वेदशास्त्रे सामान्यतः वातपित्तकफेभ्यः दोषपदस्य व्यवहरो दृश्यते। प्रकृतेः आरम्भकत्वेन विद्यमानत्वे सति विकृतिमुत्पादयितुं समर्थाः सन्ति, अतः दोषा इति कथ्यन्ते। संख्यायामेते त्रयः सन्ति, अतः 'त्रिदोषम्' इति व्यवहारः।

प्रकृत्यारम्भकत्वे सति स्वातन्त्रेण दृष्टि कर्तव्यम् दोषत्वम्।[1]

( मा. नि. मधुकोश टीका)

यदा एते प्राकृतावस्थायां शरीरे प्राकृतकर्माणि सम्पादयन्ति, तदानीम् धातुना तुल्यं धारकत्वात् पोषकत्वाच्च शरीरमुपकुर्वन्ति परम् विकृतावस्थायां शरीरं दूषयन्ति। अनया दूषितकरणशक्त्यैवेते दोषपदवाच्या भवन्ति।

दूषयन्तीति दोषाः।

समासतः वक्तुं शक्यते यदेते वातादयः दोषाः विकृतावस्थायां शरीरं रोगयुक्तं कृत्वा नाशयन्ति। प्राकृतावस्थापन्नाः सन्तः शरीरं निरामयं कृत्वा रक्षन्ति।

वातं पित्तं कफञ्चेति त्रयो दोषाः समासतः।
विकृताविकृता देहं घ्नन्ति ते वर्तयन्ति च॥[2]

एते त्रयः दोषाः यदा शरीरं धारयित्वा धातुं दूषयित्वा रोगमुत्पादयन्ति तदा दोषपदवाच्याः भवन्ति यदा चैते शरीरं मलिनं कुर्वन्ति तदा मलपदबोध्याः भवन्ति।

शरीरदूषणाद्दोषाः धातवः देहधारणात्।
वातपित्तकफा ज्ञेया मलिनीकरणान्मलाः॥[3]

त्रिदोषसिद्धान्तः

त्रिदोषसिद्धान्तः अमीभिः बिन्दुभिः प्रदर्शयितुं शक्यते-

१. त्रयाणां दोषाणां वातपित्तकफजानां समाहारः त्रिदोषम् इति व्यवहारः। वस्तुतः संख्यायामेते त्रयः सन्ति अतः त्रिदोषम् इति नाम्ना ख्याताः सन्ति। दूषणसामर्थ्याच्च दोषा इत्यभिधीयन्ते।

२. एते अस्माकं शरीरस्य मुख्यक्रियाकारकभावाः सन्ति। यैरेते शरीरे जायमानाः सर्वाः प्राकृताः वैकृताश्च क्रियाः सम्पादयन्ति।

३. प्राकृतावस्थापन्नाः सन्तः एते शरीरमुपकुर्वन्ति, वैकृतावस्थायाञ्च शरीरे नानारुजमुत्पाद्य मृत्योः कारणीभूताः भवन्ति।

त्रिदोषमहत्त्वम्

त्रिदोषं षड्धातुयुक्तस्य पुरुषस्य, यो हि चिकित्सायाः अधिकरणं वर्तते, तस्य शरीरस्य प्रमुखक्रियाकारकभावो विद्यते, अतः त्रिदोषस्याध्ययनं महत्त्वपूर्णमस्ति। शरीरस्य प्रकृतिनिर्माणे त्रयाणां दोषाणां भूमिका भवति। शुक्रशोणितयोः संयोगेन यदा गर्भो जायते, तस्मिन्समये सामान्यतः यो दोषः उत्कटो भवति, तदाधारेणैव शरीरस्य प्रकृतेः निर्धारणं भवति। अहोरात्रयोः विभिन्नेषु मुहूर्तेषु वातपित्तश्लेषमणां प्रभावो भवति, एतदाधारीकृत्य दिनचर्यायाः रात्रिचर्यायाश्च पालनं कृत्वा आरोग्यमधिगन्तुं शक्यते। नानर्तुषु दोषाणां सञ्चयः, प्रकोपः, प्रसरः, प्रशमनञ्च भवति। इत्थं यथर्तु दोषाणां सञ्चयप्रकोपप्रसरादीनां सम्यक् परिज्ञानेन ऋतुचर्यापरिपालनेन च शरीरं निरामयं भवति। संशोधनचिकित्सायामपि कस्यामृतौ कः दोषः प्रकुपितो भविष्यतीति ज्ञानमपेक्ष्यते, एतदाधृत्यैव वातपित्तकफाणां यथर्तु संशोधनं कर्तुं शक्यते। प्रकृत्यनुसारं आहारस्य निर्धारणं कर्तव्यम्। आहारद्रव्याणां चयनसमये प्रकृतेः दोषाणाञ्च ज्ञानमत्यावश्यकं वर्तते। आहारद्रव्याणां वर्गीकरणमपि वातादिदोषपरिज्ञानपुरस्सरं क्रियते। रोगाणां चिकित्साकाले तेषां हेतुनिदानसम्प्राप्त्युपभेदादयः त्रिदोषाधारिताः भवन्ति। पथ्यापथ्यनिर्देशोऽपि त्रिदोषाधारितो भवति। रुग्णाय अनुपानपथ्यापथ्यविषये निर्देशं दातुं दोषज्ञानमावश्यकं भवति। विभिन्नेषु रोगेषु पञ्चकर्मचिकित्सावसरेऽपि दोषाणां ज्ञानमत्यावश्यकम्। क्रियाशरीरे दोषधातौ मलविज्ञाने रोगपरीक्षायामपि उपयोगितां भजते। अतो हेतोः त्रिदोषं शरीरक्रियाविज्ञानस्य, रोगविकृतिविज्ञानस्य, कायचिकित्सायाश्चाधारो वर्तते।

**सन्दर्भ-**

1. माधवनिदान मधुकोशटीका
2. चरकसंहिता
3. चरकसंहिता